5

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
ग्रंथालय
ग्रंथ नाव उत्तरगीता।
लेखक

मि६५,६
४४२

अथउत्तरगीताप्रारंभः

पत्रें २०

मि ६५,६

४४२

श्रीगणेशाय नमः ॥ ॥अर्जुनउवाच॥
परंपरस्मात्प्रकृतेनरादिमेकंनिविष्टं
बहुधागुहासु॥सर्वालयंसर्वजगंनि
वासंतमेवविष्णुंशरणंप्रपद्ये॥१॥य
देकंनिष्कलंब्रह्मव्योमातीतंनिरंजनं॥
निर्गुणंपरमंदिव्यंमप्रमेयमनुत्तमं॥
॥२॥अप्रतर्क्यमविज्ञेयंविनाशोत्प
त्तिवर्जितं॥कैवल्यंकेवलंशांतंशुभ्रम

त्यंतनिर्मलं ॥३॥ कारणंयोगनिर्मुक्तं
हेतुसाधनवर्जितं ॥ निवाराग्रस्थितंसू
क्ष्मंज्ञानंज्ञेयंस्वरूपिणं ॥४॥ निर्गुणंप
रमंगुह्यंभिन्नांजनसमप्रभं ॥ तत्क्षणा
देवमुच्यंतेविज्ञानंब्रूहिकेशव ॥५॥ श्री
भगवानुवाच ॥ साधुपार्थमहाबाहोबु
द्धिमानसिपांडव ॥ यन्मांपृच्छसितत्वा
र्थमशेषंप्रवदाम्यहं ॥६॥ आत्ममंत्र

उ.गी.० स्यहंसस्यपरस्परसमाश्रयं॥ सानुरागे
णानकाम्यानांभावनाच्चैवमेवच॥७॥
२ शरीरिणामजस्याहहंसत्वंपदृश्यते।
सोहंकृत्वाक्षरंचैवकूटस्थमचलंध्रुवं॥
॥८॥ पिंडेमुक्तापदेमुक्तारूपेमुक्ताप
जाननाः॥ रूपातीतास्तुयेमुक्तातेमुक्ता
नात्रसंशयः॥९॥ तद्विद्वानक्षरंप्राप्य
त्यजेन्मरणजन्मनी॥ स्थीरबुध्यीरसंम २

ढो ब्रह्मबिंदुर्णिस्थित: ॥१०॥ काकीमुख
ककारांत ईकारश्चेतनाधृति ॥ ककारस्त
त्र लुप्यंते क्रोधसंप्रतिपद्यते ॥११॥ याव
त्पश्येत् खगाकारं तदाकारं विचिंतये
त् खंमध्ये च प्रतिष्ठेयं खं च ब्रह्मसनां
तनं १२ आत्मा खेनैं मयं कृत्वा न किं
चिदपि चिंतयेत् भिन्ने कुंभे यथाका
शे आकाश: प्रतिपद्यते १३ खंमध्ये

उ.गी कुर्वोरहैत्मानंआत्ममध्येचखंकुरु अ
३ भिन्नेप्राकृतेदेहेयथाचात्मनमात्मनि
१४ बहिर्व्योमास्थितंनित्यंनासाग्रे
चव्यवस्थितं निर्मलंतद्विजानीया
त्षडूर्मिरहितंशिवं १५ प्रभाशून्यं
मनःशून्यंबुद्धिशून्यंनिरामयं सर्वशू
न्यंनिराभासंसमाधिस्थस्यलक्षणं।
१६ ऊर्ध्वशून्यमधःशून्यअधःशू ३

न्यनिरामयं त्रिशून्यंचविजानातिस
विमुच्येतबंधनात् १७ अमात्रशब्दर
हितंस्वरव्यंजनवर्जितं बिंदुनादकलाती
तंयस्तंवेदसवेदवित् १८ प्राप्तेज्ञानेन
विज्ञानेज्ञेयंचहृदिसंस्थिते लब्धेशां
तेपदेदेहेनयोगीनैवधारणात् १९
योवेदादौस्वरःप्रोक्तोवेदांतेचप्रतिष्ठि
ताः तस्यप्रकृतिलीनस्ययःपरस्यम

हेश्वरः॥२०॥नावार्थिभजतेनावंया
वत्पारंनगच्छति उत्तीर्यपारपर्यंतेना
वयाकिंप्रयोजनं २१ ग्रंथमभ्यस्यमे
धाविज्ञानवित्तानतत्परः पलालमि
वधान्यार्थित्यजेत्ग्रंथमशेषतः २२
उल्काहस्तोयथाकाछंद्रव्यमालोक्य
तत्त्यजेत्। ज्ञानेनज्ञेयमालोक्यप

श्वाज्ञानं परित्यजेत् २३ यथामृते
न तृप्तस्य पयसा किं प्रयोजनं एवं त
त्वपरं ज्ञात्वा वेदैर्नास्ति प्रयोजनं २४
ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य यो
गिनां नैवास्ति किंचित्कर्तव्यमस्ति
चेन्न स तत्त्ववित् २५ तैलधारामिवा
च्छिन्नं दीर्घघंटानिनादवत् ॥ सवाग्रं
प्रणवस्याग्रं यस्तं वेद स वेदवित् २६

उ॰गी॰ आत्मानमरणंीकृत्वाप्रणवंचोत्तरारणी
ध्याननिर्मथनाभ्यासादेवंपश्यामिगूढ
५ वत् २७ विधूमाग्निनिभंदेवंपश्यद
त त्यंनिर्मलं तादृशंपरमंरूपंस्मरत्यर्थ
मनन्यभाक् २८ दूरस्थोपिनदूरस्थो
पिंडब्रह्मांडवर्जितं अमलोसर्वदादे
हीसर्वव्यापिनिरंजनं २९ कायस्थो
पिनकायस्थःकायस्थोपिनजायते ५

कायस्छोपि न भुंजानः कायःस्छोपि
न बाध्यते ३० लैतिमध्येयथातेलं
क्षीरमध्येयथाघृतं पुष्पमध्येयथागं
धो फलमध्येयथारसः ३१ काष्ठा
ग्नि वत्प्रकाशेनआकाशेवायुवच्चरे
त् यथासर्वगतोदेहीदेहमध्यव्यव
स्छितः ३२ मनस्छोवेत्तिनोदेवं म

उ.गी. नमध्येव्यवस्थितं यावत्पश्येत्तवगा
६ कारं तदाकारं तदाकारं विचिंतये ३३
मनस्थं मनमध्यस्थं मनस्थं मन
वर्जितं मनेन मनसालोक्य स्वयंसि
ध्यंति योगिना: ३४ आकाशं मान
सं कृत्वा मनः कृत्वा निरासदं निश्च
लं तद्द्विजानाति समाधिस्थस्यलक्ष ६

णं ३५ सर्वशून्यं तदात्मेति समाधि
स्थस्य लक्षणं भूतभाविज्ञतात्मा पुण्य त
पापैः प्रमुच्यते ३६ अदृश्यभावना
नास्ति दृश्यमानो विनश्यति अवर्ण
मीश्वरं ब्रह्म कथं ध्यायंति योगिनः ३७
श्रीभगवानुवाच ऊर्ध्वं पूर्णमधः पूर्णं
मध्यपूर्णं तदात्मकं सर्वपूर्णं तदात्मे
ति समाधिस्थस्य लक्षणं ३८ सो

उ.गी. लंबस्य अनित्यत्वं निरालंबस्य शून्य
७ ता उभयोरपि दोषोक्ति कथं ध्यायंति
योगिनः ३९ श्रीभगवानुवाच हृ
दयं निर्मलं कृत्वा चिंतयित्वा ह्यनाम
यं अहमेवमिदं सर्वमिति पश्यस्तरंसु
खं ४० अर्जुनउवाच अक्षराणि च
मात्राणि सर्वे बिंदुसमाश्रितः बिंदु
र्भिद्यति दानेन नसनादः केन भिद्यति ४१

श्रीभगवानुवाच ॐकारध्वनिनादे
नवायुसंहरणांतिकं निरालंबसमु
द्दिश्यतत्रनाहोलयंगतः ४२ भिन्ने
पंचात्मकेदेहेगतेपंचेषुपंचधा प्राणो
विमुक्तदेहस्यधर्माधर्मौक्कगछतः ४२
श्रीभगवानुवाच धर्माधर्ममनश्चैव
पंचभूतानियानिच इंद्रियाणितुपं

उ०गी चैतेयेचान्येपंचदैवताः ४४ तथै
८ वमनसासर्वेनित्यमेवाभिमानिनां॥
जीवेनसहगच्छंतियावत्तत्वंनविंदति
४५ अर्जुनउवाच स्थावरंजंगमं
वापियत्किंचित्सचराचरं जीवजीवे
नजीवंतिसोजीवःकेनजीवति ४६
श्रीभगवानुवाच मुखनासिकयोर्म ८

ध्येप्राणाः संचरतेस्वयं आकाशपिब
तेप्राणंसजीवस्तेनजीवति ४७ अ
र्जुनउवाच ब्रह्मांडव्यापितंव्योमव्यो
वा म्नाविष्टितंजगत् अंतर्बहिस्थितंव्यो
मकथंध्यायंतियोगिनः ४८ श्रीभ
गवानुवाच आकाशात्यवकाशश्चआ
काशंव्यापितंचयत् आकाशस्यगुणाः

गुत. शब्दोनिःशब्दब्रह्मउच्यते ४९ अर्जु
९ नउवाच दंतोष्ठतालुजिह्वायांयत्सदं
नेवदृश्यते अक्षरत्वंकुतस्तेषांक्षर
त्वंवर्त्ततेसदा ५० श्रीभगवानउवा
च अघोषमव्यंजनमस्वरंचअता
लुदंतोष्ठमनासिकंच अरेफजातं ९
क्षरयुग्मवर्जितंतदक्षरंनक्षरतेकदा

२२५

चित् ५२ अर्जुनउवाच इंद्रियाणां
निरोधेन देहपश्यंतिमानवः देहेन
ष्टकुतोबुध्यिर्बुध्यिनाशेकुतोज्ञता ५२
श्रीभगवानुवाच तावद्देहनिरोध
स्याद्यावत्तत्वंनविंदति विदितत्वे
परेतत्वेयेवमेवानुपश्यति ५३ न
वछिद्रपुरेदेहेश्रवंतिघटिकाइव:

उ॰गी एवंवाह्येनशुद्धेनशुभान्ब्रह्मनविंदति
१० ५४ अत्यंतमलिनोदेहोदेहीचात्यं
तनिर्मलं उभयोरंतरंज्ञात्वाकस्यशौ
चंविधीयते ५५ इतिप्रथमोध्या
यः ॥ ॥ ॥ श्रीराम
अर्जुनउवाच नित्यंज्ञानपरंब्रह्मब्रह्माज्ञंप
रमेश्वरं अहंब्रह्मेतिनिर्दिष्टंप्रमाणंतत्रकिं १०

भजेत् १ श्रीभगवानुवाच यथाजलेजल
क्षिप्तंक्षीरेक्षीरंघृतेघृतं अविशेषंभवेत्तद्व
त्जीवात्मापरमात्मनि २ जीवःपरेतदात्मे
तिसर्वगंज्योतिरीश्वरं प्रमाणंलक्षणंज्ञे
यंस्वयमेकाग्रवादिनः ३ प्रमाणंलक्षणं
ज्ञेयंस्वयमेकाग्रवादिनः अहंब्रह्मेतिनि
र्दिष्टंप्रमाणंतत्रकिंभवेत् ४ ज्ञानस्थंभ

उ॰गी॰ वतिज्ञेयविदितेतत्क्षणेनतु ज्ञानमात्रेण
११ मुच्यंतेकिंपुनर्योगधारणा ५ ज्ञानेनदी
पितंदेहंबुध्विब्रह्मसमाश्रितः ब्रह्मज्ञा
नाग्निनानित्यंदहंतेपुण्यपापयोः ६
आकाशवत्सूक्ष्मशरीरमात्मानदृश्यते
वायुवदंतित्वात्मा सबाह्यमभ्यांतरनि
श्चलात्माज्ञानोकयादृश्यतित्वांतरात्मा ११

७ यत्रयत्रमृतोज्ञानियेनकेनापिमृत्यु
ना यथासर्वगतंव्योम तत्र तत्र लयंगतं
८ शरीरंव्यापितंव्योमभुवनानिचतुर्द
शः निश्चलोनिर्मलोदेहोसर्वव्यापिनि
रंजनं ९ मुहूर्तमपियोगस्थोनासाग्रे
मनसाअपि सर्वेतरंतिपाप्मानंतस्य
जन्मशतैरपि १० दक्षिणापिंगलानाडी

उ॰ गी॰ सूर्यमंडळगोचराः मात्तयोनिमितिज्ञे
१२ याबुध्दिःकर्मानुसारिणी ११ इडाचवा
मनिश्वासाचंद्रमंडळगोचराः पित्तयो
निमितिज्ञेयाबुध्दिःकर्मानुसारिणी
१२ गुदस्यपृष्ठभागेस्मिन्वीणादंडाख्य
देहभृत् दीर्घस्थंमूर्ध्निपर्यंतंब्रह्मदंडंच
कथ्यते १३ तस्यांतेसुषिरंसूक्ष्मंब्रह्म १२

नाडीवस्रुरिभिः इडापिंगलयोर्मध्येसु
षुम्नाअग्निमंडळः १४ सर्वंप्रतिष्ठितं
तस्मिन्सर्वांगंज्योतिरीश्वरं तस्मिन्मम
गतंसूर्यंसोमाग्निपरमेश्वरं १५ भूता
लोकादिशःक्षेत्रासमुद्रापर्वताचला द्वी
पाश्वनिम्नगावेदाशास्त्राविद्याकलाक्ष
राः १६ सुषुम्नांतर्गतंतस्मिन्देहकंटप्र

तिष्ठितं नानानाडिप्रवर्गंचसर्वभूतांतरात्
मनि १७ ऊर्ध्वमूलमधःशाखा वायुमार्गे
णसर्वगः द्विसप्ततिसहस्राणिनाड्यस्त
वायुगोचराः १८ कर्ममार्गेपिसकलाःस्थै
र्यस्थोसकलात्मकः अधश्चोर्ध्वगतस्था
सासर्वद्वाराणिरोधयेत् १९ वायूनासह
तेचोर्ध्वज्ञानमोक्षमवाप्नुयात् अमराप

तिलोकेस्मिन्मुखाग्रे पर्वतोदशी। २० अग्नि
लोकमविज्ञेयं चक्षुस्तेजोवतीपुरीः याम्य
संयमनिश्रोत्रे यमलोकप्रतिष्ठितं २१ नै
र्ऋत्योभयपार्श्वे तु नैर्ऋत्यलोकमाश्रितं
विभातिचप्रतिच्यां तु पृष्ठे वारुणिकांपुरी।
२२ वामेगंधवतीकर्णे वायुलोकप्रतिष्ठि
तं सोम्यपुष्पवतीलोकेचंद्रलोकप्रतिष्ठितं

२३ वामकर्णेनुविज्ञेयंदेहमाश्रित्यतिष्ठति
वामेचक्षुपुरीचैवशिवलोकमनोन्मनी।
२४ मूर्ध्निब्रह्मपुरीज्ञेयंब्रंह्मांडेदेहमाश्रि
तः पादादपिशिरस्यांतेकालाग्निप्रळयां
तिकं २५ अनामयोश्वोर्ध्वमध्येमंतर्हीः
शिवआहृथः पादातलंततोचियासादोर्ध्व
वितुलंविदुः २६ वितुळंपावमध्यंचसु

तळंजंघमुच्यते रसातलंचजानुभ्यांऊरु
देशोमहातळं २७ कटीतळातळंप्रोक्तंस
प्तपाताळसंज्ञिकं पाताळनामधोमूळं
भोगीनांफणिमंडलं २८ ज्येष्ठतेसर्वतो
नंतसर्वहृद्यमनास्थिते भूर्लोकनाभिम
ध्यस्थंभुवर्लोकंतुकुक्षिकं २९ हृदयंसर्व
लोकंतुसूर्यादिग्रहपर्यंतात् सोमसूर्यस

नक्षत्रबुधःशुक्रकुजांगिरः ३० मदंसप्तर्ष
योज्ञेयाध्रुवोतःसर्वलोककृत् हृदयेकल्पि
तेदेहीतस्मिन्सर्वसुखावहः ३१ चक्षुरादि
महर्लोकंजनलोकंतुकंटके तपोलोकोभ्रु
वोर्मध्येमूर्ध्निसत्यंप्रतिष्ठितं ३२ ब्रह्मां
डेनावृतोलोकेअंडमध्येप्रतिष्ठितं एवंब्र
ह्मांडनिलयंतस्मिन्देहप्रतिष्ठितं ३३

ब्रह्मांडव्यापिनीपृथ्वीतोयमध्येविलीयते
अग्निनापिबतोतोयंवायुनाग्निरपाश्यते
३४ आकाशःपिबतेवायुमनःसाकाश
मेवच बुध्याहंकारचित्तस्यक्षेत्रज्ञःपरमा
त्मनि ३५ तूर्यंतात्तिततत्तश्वशिवस्थान
मनामयं धत्तेसमस्तमात्मेतिध्यायतेप
रमात्मनि ३६ अहंब्रह्मेमांध्यायेदेकाग्र

ति

मनसासकृत् सर्वेतरंतिपाप्मानंकल्पको
टिशतैरपि ३७ घटाकाशमिवात्मानंविल
यंयांतितत्वतः सगच्छतिनिरालंबंज्ञानलो
क्यनिसंशयः ३८ घटासंवर्तमाकाशंली
यमानेघटेयथा आकाशमपिलीनस्यात
द्वज्जीवोपिमात्मनि ३९ तेपेद्वर्षसहस्रा
णिएकपादास्थितोनरः एकेनध्यानयोगे

नकलानार्हंतिषोडशी ४० ब्रह्महत्यासहस्रा
णिवीरहत्याशतानिच एकेनध्यानयोगेन
देहदग्निरिवेधनं ४१ अश्वमेधसहस्राणि
वाजपेयशतानिच एकेनध्यानयोगेनक
लानार्हंतिषोडशी ४२ अनंतकर्मशौच्यंच
जपयज्ञंतथैवच वेदाध्ययनतीर्थानिया
वत्तत्वंनविंदति ४३ तावद्भवतिसंसारो
यावदात्मानविंदति विदितेतुपरेतत्वेए

कमेवानुपश्यति ४४ अहंब्रह्मेतिलीयेन
अक्षरंद्वयमात्मनः स्वयंउच्चारतेदेहेतद्ब्र
ह्मत्वंनसंशयः ४५ चतुर्वेदधराविप्रासू
क्ष्मंब्रह्मनविंदति वेदभारभराक्रांतास
चब्राह्मणगर्दभः ४६ पठितानिचतुर्वेदा
धर्मशास्त्रमनेकधा नाहंब्रह्मेतियोविद्या
दर्विपाकरसंयथा ४७ यथाखरश्चंदन
भारवाहीभारस्यवेत्तानतुचंदनस्य एवं

हिशास्त्राणिबहूविदित्यज्ञानेनहीनाखर
वद्भवंति ४८ आहारनिद्राभयमैथुनं
चसमानमेतत्पशुभिर्नराणां ज्ञानंनरा
णांमधिकोविशेषोज्ञानेनहीनापशुभिः
समानः ४९ प्रातर्मूत्रपुरीषाभ्यामाध्या
न्हेक्षुत्पिपाशया तृप्ताकामेनबाध्यंतेजं
नवोनिशिनिद्रया ५० नादबिंदुसहस्त्रा
णिकोटिबीजशतानिच सर्वतद्भस्मनीहु

उ०गी० त्वायोविंदतिनिरामयं ५१ गवामनेकवर्णा
१८ नांक्षीरस्याप्येकवर्णता क्षीरवत्पश्यतिज्ञा
नीलिंगीनांतुगवांयथा ५२ द्वेपदेबंधमो
क्षायनिर्ममेतिममेतिच ममेतिबध्यतेजं
तुर्निर्ममेतिप्रमुच्यते ५३ मनसाहमना
भावोद्वैतेनैवोपलभ्यते यत्रयत्रमनोभा
वंतत्रदात्मात्परंपदं ५४ हन्यान्मुष्टिभि
राकाशंक्षुधार्थःकंडुकंयथा ब्रह्मदत्तेन १८

ज्ञानाति तस्य मुक्तिर्न जायते ५५ इति श्री
उत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां यो
गशास्त्रे श्रीकृष्णार्जुनसंवादे द्वितीयोध्या
यः २ ❀ ❀ ❀

उत्तरगीतासमाप्तं
पत्रें २०